# द्वितीयसमाकलनपरीक्षा, 2018-19

## संस्कृतम्

**अवधि - होरात्रयम्** **कक्षा - दशमी** **पूर्णांकाः - अशीतिः**

**विद्यार्थिनः नाम ........................................................................................ वर्गः ....... दिनांकः - 15.09.2018 (शनिवासरः)**

**निर्देशाः -**

- प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
  - खण्डः (क) अपठित-अवबोधनम् - 10 अङ्काः
  - खण्डः (ख) रचनात्मक – कार्यम् - 15 अङ्काः
  - खण्डः (ग) अनुप्रयुक्त-व्याकरणम् - 25 अङ्काः
  - खण्डः (घ) पठित– अवबोधनम् - 30 अङ्काः
- सर्वे प्रश्नाः अनिवार्याः सन्ति।
- प्रश्नानाम् उत्तराणि खण्डक्रमानुसारं क्रमेणैव लेखनीयानि।
- उत्तराणि संस्कृतेनैव लेखनीयानि।

## खण्डः क (अपठितावबोधनम् - 10 अंकाः)

**प्र.1 अधोलिखितं गद्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत -**

अधुना संसारः युद्धस्य भयेनाक्रान्तः रूग्ण इव प्रतिभाति-साम्प्रतम्। इदं जगत् युद्धेन इत्थं पीडितः अस्ति यथा कस्मिंश्चिदपि काले नाभवत्। समर्थाः देशाः अन्यान् न विगणयन्ति । रूस अमेरिका, फ्रांस, जर्मनी, चीनादि देशाः परस्परं युद्धस्य वातावरणं सृजन्ति । स्वयं युद्धे न रमन्ते किन्तु अपरान् युद्धार्थं प्रेरयन्ति। युद्धं सदा विनाशकारकं भवति । ये देशाः जयन्ति, तेऽपि अपारधन-जनहानिं सहन्ते च। यदा युद्धं भविष्यति, तदा संसारे भयंकरः विनाशः भविष्यति। आदर्शवादिनः जनाः युद्धं वर्जयित्वा शान्ति स्थापनार्थं प्रयतन्ते ।

**क) एकपदेन उत्तरत -** **(1×2=2)**

अ) कीदृशाः देशाः अन्यान् न विगणयन्ति ?

ब) शान्तिस्थापनार्थं के प्रयतन्ते ?

**ख) पूर्णवाक्येन उत्तरत -** **(2×2=4)**

अ) रूस अमेरिकादयः देशाः किं कुर्वन्ति ?

ब) युद्धस्य परिणामं किं भवति ?

**ग) प्रदत्त विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत -** **(½×4=2)**

अ) 'जयन्ति' इति क्रियापदस्य किं कर्तृपदम् -

(i) अन्याः (ii) देशाः (iii) रूग्णाः (iv) भयाक्रान्ताः

ब) 'इदानीम्' इति अव्ययस्य किं पर्यायपदमत्र प्रयुक्तम् ?

(i) तदा (ii) ये (iii) देशाः (iv) अधुना

स) 'भयंकरः' इत्यस्य किं विशेष्यपदम् ?

(i) युद्धम् (ii) विनाशः (iii) शान्तिः (iv) देशाः

द) 'नाशयन्ति' इत्यस्य अनुच्छेदे किं विपर्ययं पदं प्रयुक्तम् ?

(i) सरन्ति (ii) परिसृजन्ति (iii) नश्यन्ति (iv) सृजन्ति

**घ) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत ।** **(2)**

## खण्डः - ख (रचनात्मककार्यम् - 15 अंकाः)

**प्र.2 भवान् कमलेशः बैंगलूरू नगरे निवसति। भवतां मित्रं सोमेशः दिल्ली नगरे वसति। सः संस्कृतभाषण-प्रतियोगितायां प्रथमं स्थानं प्राप्तवान् । तं प्रति लिखितं वर्धापन पत्रं पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत ।** **(½×10=5)**

| मञ्जूषा - | कमलेशः, आनन्दितम्, कोटिशः, प्रशंसनीयः, भवताम्<br>बैंगलूरूः, प्राप्तवान्, साफल्यम्, सोमेश, प्रथमं |
|---|---|

गिरिनगरम् (1).................

कर्णाटक प्रदेशतः

प्रिय मित्र (2).................।

नमोनमः ।

(3)................. पत्रं प्राप्तम् । पत्रं पठित्वा मम मनः (4)................. जातम्। भवान् संस्कृतभाषणप्रतियोगितायां (5)................. स्थानं (6).................। भवतां संस्कृतानुरागः (7).........। मत्पक्षतः (8)................. वर्धापनानि भगवान् इतः अपि अधिकं (9)................. ददातु।

पितृचरणयोः प्रणामः निवेद्यते।

भवतां प्रियसुहृद्

(10).................

**प्र.3 अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायाः प्रदत्तशब्दानां सहायतया संस्कृते पञ्चवाक्यानि रचयत ।** **(2×5=10)**



| मञ्जूषा - | प्रातःकाले, आकाशे, एकः, बालकौ, खगौ, व्यायामं,<br>कुरूतः, शीतलवायुः, सूर्योदयः, वातावरणम् |
|---|---|

## खण्डः - ग (अनुप्रयुक्तव्याकरणम् - 25 अंकाः)

**प्र.4 निम्नलिखितवाक्येषु रेखाकिंतपदानां सन्धिं विच्छेदं वा कृत्वा लिखत -** **(1×4=4)**

क) नृपस्य स्वेषु गात्रेषु+अपि निरासक्तिः अभवत् ।

ख) पुंसः सम् + गः विषयेषु उपजायते ।

ग) सज्जनाः शशिकिरणसमाः भवन्ति ।

घ) कामात् क्रोधोऽभिजायते ।

**प्र.5 अधोलिखितेषु वाक्येषु रेखांकितपदेषु समासं विग्रहं वा कृत्वा लिखत -** **(1×4=4)**

क) अनुद्वेगकरं वाक्यमेव वाङ्.मयं तपः उच्यते ।

अ) न अनुद्वेगकरम् ब) अननुद्वेगकरम् स) न उद्वेगकरम् द) उद्वेगकरं न

ख) साधुवृत्तिं समाचरेत्

अ) साधू वृत्तिम् ब) साधो वृत्तिम् स) साधूनाम् वृत्तिम् द) साधवे वृत्तिम्

ग) न गर्वो न दैन्यं न च क्रोधः च लोभः च।

अ) क्रोधलोभम् ब) क्रोधलोभे स) क्रोधलोभौ द) क्रोधलोभः

घ) सर्वे उपगंगम् एवं गच्छन्ति ।

अ) गंगायाः समीपे ब) गंगायाः तटम् स) गंगायाः तटे द) गंगायाः समीपम्

**प्र.6 अधोलिखितवाक्येषु रेखांकितपदेषु प्रकृति-प्रत्ययान् संयोज्य विभज्य वा लिखत -** **(1×4=4)**

क) तत्र अर्थिनां समूहः अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत् ।

अ) अर्थ + ईन् ब) अर्थ + णिनि स) अर्थ + इनी द) अर्थ + ङीप्

ख) अस्माकम् अर्धवर्ष + ठक् परीक्षा सितम्बरमासे भविष्यति ।

अ) अर्धवार्षिक ब) अर्धवार्षीकी स) अर्धवार्षिकी द) अर्धवार्षिकः

ग) शिक्ष् + शतृ शिक्षकः फलं दर्शयति ।

अ) शिक्षन् ब) शिक्षयन्तः स) शिक्षयनती द) शिक्षयन्

घ) मात्रा वस्त्राणि क्षाल् + अनीयर् ।

अ) क्षालनीयः ब) क्षालनीया स) क्षालनीयानि द) क्षालनीयम्

**प्र.7 अधोलिखितं संवादं वाच्यपरिवर्तनं कृत्वा पूरयित्वा च पुनः लिखत -** **(1×3=3)**

रमा - सुधे ! त्वं कस्याम् कक्षायाम् (1)................. ?

सुधा - (2)................. तु दशमकक्षायां पठ्यते ।

रमा - त्वं कति वादने विद्यालयं गच्छसि ?

सुधा - मया नववादने विद्यालयः (3)................. ।

**प्र.8 भवतः विद्यालये संस्कृतश्लोकोच्चारण प्रतियोगिता अस्ति । तत्र कः कार्यक्रम कतिवादने च भविष्यति इति कोष्ठके दत्तं समयं संस्कृते रिक्तस्थानेषु लिखत -** **(½×4=2)**

क) प्रातः 10:15 (1) .................................. दीप प्रज्ज्वालनं सरस्वती वन्दना च ।

ख) प्रातः 11:30 (2) .................................. श्लोक प्रतियोगितायाः उद्घाटनम् ।

ग) (12:45) ................................ निर्णयस्य घोषणा ।

घ) (1:00) ................................ पुरस्कारवितरणम् धन्यवादज्ञापनम् च।

**प्र.9 अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषाप्रदत्तैः उचितैः अव्ययपदैः पूरयित्वा लिखत -** **(1×4=4)**

| **कदा, यावत्, मा, अधुना** |
|---|

क) ............................ अहम् बहिः अगच्छम् तावत् वर्षा आरभत ।

ख) कोलाहलं ............................ कुरूत ।

ग) यूयं ............................ आगच्छत ?

घ) ............................ पठनाय उपनिवश ।

**प्र.10 अधोलिखितवाक्येषु रेखांकितपदं अशुद्धम् अस्ति। अशुद्धं पदं संशोध्य पुनः लिखत -** **(1×4=4)**

क) मम कक्षायाः <u>सर्वे</u> बालिकाः तत्र आगच्छन् ।

ख) तर्हि एव जीवनं <u>सफला</u> भविष्यति ।

ग) तत्र <u>अनेकानि</u> अतिथयः आगच्छन् ।

घ) <u>माम्</u> एषः विषयः अति रोचते ।

## खण्डः - घ (पठितावबोधनम् - 30 अंकाः)

**प्र.11 अधोलिखितं गद्यांशं पद्यांशं नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत -**

**क) गद्यांशः -**

अथ अन्यस्मिन् अहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलित काष्ठेन ताडितः। ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्रविशति दाहवेदनया च भूमौ लुठति। तस्य क्षितौ प्रलुठतः तृणेषु वह्नि ज्वालाः समुत्थिताः।

**अ) एकपदेन उत्तरत -** **(2×1=2)**

(i) सूपकारेण मेषः केन ताड़ितः ?

(ii) जाज्वल्यमानशरीरः कः अश्वशालां प्रविशति ?

**ब) पूर्णवाक्येन उत्तरत -** **(1×2=2)**

कदा कुत्र च वह्निज्वालाः समुत्थिताः ?

**स) प्रदत्तविकल्पेभ्यः, उचितम् उत्तरं चित्वा लिखत -**

(i) 'जाज्वल्यमानशरीरः मेषः' अत्र विशेषणपदं किम् ?

(a) जाज्वल्यमानशरीरः (b) जाज्वल्यमानः (c) मेषः (d) शरीरः

(ii) अनुच्छेदे आगतस्य 'लुठति' इति क्रियापदस्य कर्तृपदं किम् ?

(a) अश्वशालाम् (b) वह्निना (c) मेषः (d) अश्वः

(iii) गद्यांशे 'क्षितौ' पदस्य कः पर्यायः आगतः ?

(a) मेषो (b) अहनि (c) तृणे (d) भूमौ

(iv) 'तस्य क्षितौ अत्र तस्य पदं कस्मै आगतम् ? **(½×4=2)**

(a) नृपाय (b) मेषाय (c) अश्वाय (d) सूपकाराय

**ख) पद्यांशः -**

चंचलं हि मनः कृष्ण ! प्रमाथि बलवद्दृढम् ।

तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ।।

**अ) एकपदेन उत्तरत -** **(2×1=2)**

(i) मनः कीदृशमस्ति ?

(ii) मनसः किं विशेषणं वर्तते ?

**ब) पूर्णवाक्येन उत्तरत -** **(1×2=2)**

अर्जुनानुसारं मनसः निग्रहं कीदृशम् अस्ति ?

**स) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत -** **(½×4=2)**

(i) श्लोके 'तस्य' पदं कस्मै आगतम् -

(a) कृष्णाय (b) अर्जुनाय (c) मनसे (d) नकुलाय

(ii) 'बलवद्दृढम्' इदं कस्य विशेषणं वर्तते ?

(a) कृष्णस्य (b) अर्जुनस्य (c) मनसः (d) देवस्य

(iii) 'अतीव कठिनम्' इत्यस्य पदस्य कः पर्यायः श्लोके आगतः ?

(a) दुष्करम् (b) सुदुष्करम् (c) मनसः (d) चंचलम्

(iv) श्लोके 'अहम्' इति कर्तृपदस्य क्रियापदं किम् ?

(a) निग्रहम् (b) प्रमाथि (c) मन्ये (d) सुदुष्करम्

**ग) नाट्यांशः -**

शक्रः - हे राजन् ! भवतः दानवीरताम् आकर्ण्य आशान्वितः भवत्समीपम् आगतोऽस्मि। देवः रवि शशि तारा मण्डल भूषितं जगत् एतत् कथमिव पश्येयम् चक्षुर्हीनः ।

राजा - भगवन् ! भवन्मनोरथं पूरयित्वा आत्मानम् अनुगृहीतं कर्तुम् इच्छामि । आदिश्यतां किं करवाणि ?

विप्रः - (शक्रः) यदि भवान् प्रीतः तदा त्वत्तः एकस्य चक्षुषः दानमिच्छामि येन मम लोकयात्रा निर्बाधा भवेत् ।

**अ) एकपदेन उत्तरत -** **(2×1=2)**

(i) विप्रस्य रूपे कः आसीत् ?

(ii) राजा कस्य मनोरथं पूरयित्वा आत्मानम् अनुगृहीतं कर्तुमिच्छति ?

**ब) पूर्णवाक्येन उत्तरत -** **(2×1=2)**

विप्रः कीदृशं जगत् द्रष्टुमिच्छति ?

**स) प्रदत्तविकल्पेभ्यः उचितम् उत्तरम् चित्वा लिखत ।**

(i) 'निर्बाधा' इति विशेषण पदस्य विशेष्यपदं किम् ?

(a) जगत् (b) दृष्टिः (c) लोकयात्रा (d) दानवीरता

(ii) 'यदि भवान् प्रीतः' इत्यत्र 'भवान्' इति सर्वनाम पदं कस्मै प्रयुक्तम् ?

(a) विप्राय (b) राज्ञे (c) अमात्याय (d) महीपालायः

**(iii)** किं आकर्ण्य आशान्वितः आगतः अस्मि । **(½×4=2)**

**(a)** देवः **(b)** भगवन् **(c)** दानवीरताम् **(d)** विप्रः

**(iv)** 'एकस्य चक्षुषः दानमिच्छामि' अस्मिन् वाक्ये विशेषणपदं किम् ?

**(a)** एकस्य **(b)** दानम् **(c)** इच्छामि **(d)** चक्षुषः

**प्र.12 रेखांकित पदानि आधृत्य प्रश्ननिर्माणं कुरूत -** **(1×4=4)**

क) सरस्वत्याः कोषः व्ययतः वर्धते ।

ख) प्राज्ञः कलहयुक्तं गृहं दूरतः परिवर्जयेत् ।

ग) कपिभिः उपदेशाः अवधीरिताः ।

घ) मनसः निग्रहः वायोः इव कठिनः ।

**प्र.13 अधोलिखित श्लोकद्वयस्य अन्वयं पूरयत ।** **(½×8=4)**

क) कोऽनर्थफलः ? मानः का सुखदा ? साधुजन मैत्री ।

सर्वव्यसन विनाशे को दक्षः ? सर्वथा त्यागी ।।

**अन्वयः** - (1)....................... कः ? मानः । सुखदा का ? साधुजन (2).......................।
सर्वव्यसन (3)....................... कः दक्षः ? (यः) सर्वथा (4)....................... (भवति)।।

ख) न तथा शीतलसलिलं न चन्दनरसो न शीतला छाया ।

प्रह्लादयति च पुरुषं यथा मधुरभाषिणीवाणी ।।

**अन्वयः** - यथा (1)................ वाणी पुरुषं प्रह्लादयति तथा न शीतलं (2)................न चन्दन (3)................ न च (4)................ छाया (पुरूषं प्रहलादयति)।

**प्र.14 अधोलिखितकथनानां समुचितं भावं विकल्पेभ्यः चित्वा लिखत -** **(1×4=4)**

क) किं किम् उपादेयम् ?

अ) त्याज्यम् ब) दानयोग्यम् स) अनुकरणीयम् द) लाभकरम्

ख) पाप्मानं प्रजहि ह्येनं ज्ञान विज्ञाननाशनम् ।

अ) त्यज ब) प्रजा स) मारय द) परित्यज्य

ग) यूथपः कपीन् आहूय रहसि अवदत् ।

अ) प्रासादे ब) वने स) गृहे द) एकान्ते

घ) स्वाध्यायाभ्यसनं चैव वाङ्मयं तपः ।

अ) साहित्यम् ब) वाकयुक्तम् स) वाचिकम् द) वानिकम्